# शान्तिशिक्षायाः महत्त्वविचारः

**डा.नारायण वैद्य**
अतिथिप्राध्यापकः, शिक्षाविभागः
राष्ट्रियसंस्कृतसंस्थानम् ( मानितविश्वविद्यालयः )
राजीवगान्धीपरिसरः, मेणसे, शृङ्गेरी - 577139

अद्यत्वे शान्तिशिक्षायाः महत्त्वम् अनुभूयते । यतः भ्रष्टाचारः अशान्तिश्च समाजे सर्वत्र व्याप्तं वर्तते । साम्प्रतं जनाः आदर्शः मूल्यम् उत्तमसामाजिकव्यवस्थां च त्यक्तवन्तः । जीवनस्य मुख्यं लक्ष्यम् उद्देश्यं सर्वाङ्गीणविकासं च विस्मृत्य मनोरञ्जनम् ऐश्वर्यं सुखं सम्पत्तिं च प्राप्तुं जनाः प्रवर्तन्ते । तदेव जीवनस्य प्रमुखं लक्ष्यम् अभवत् । धर्मार्थकाममोक्षादीनां चतुर्विधपुरुषार्थानां साधनं गौणं जातम् अस्ति । एतेन मानवः मानसिकम् अस्वास्थ्यम् अनुभवति । उत्तमसमाजस्य निर्माणं कर्तुम् निष्फलो भूत्वा सामाजस्य घातकः अभवत् । अतः शान्तिशिक्षा आवश्यकी । शान्तिशिक्षायाः महत्त्वम् अग्रे वर्णयामि ।

## आदर्शसामाजिकव्यवस्थायाः निर्माणम्

समाजो नाम जनानां समूहः । समूहेऽस्मिन् सद्व्यवहारः अपेक्षते । सद्व्यवहारः आदर्शसमाजस्य परिचायकः भवति । इदं च चित्रणं प्राचीनकाले विलोक्यते । उक्तं च –

सर्वत्र सम्पदः सन्तु नश्यन्तु विपदः सदा ।
राजा रामगुणोपेतः भूमिमेकः प्रशास्तु नः ॥

एषा भावना साम्प्रतं न दृश्यते । अधुना प्रजातन्त्रमित्युक्तौ दुराचारप्रवृत्तिः दृश्यते । राजा धार्मिकः सन् राजनीतिकुशलः न भवति, अपि तु स्वस्य जातेः समुदायस्य, धर्मस्य वा हितचिन्तकः भवति । अतः समाजे सामान्यानां जनानां पोषणस्य अपेक्षया शोषणम् आधिक्येन प्रवर्तते । तस्मात् समाजस्य स्वरूपं नष्टं जातम् । एवं स्वरूपनाशात् शान्तिरपि नष्टा । अतः शान्तिशिक्षायाः महत्त्वम् अनुभूयते । शान्तिशिक्षया विवेचनशक्तिः विकसति । विवेचनेन दुष्टचिन्तनानि अपि अवरुद्धानि भवन्ति । विवेचनशीलः सत्यस्य परीक्षणं करोति । एवमेव जनानां जागृतेः कारणेन सर्वकारोऽपि समुचितं प्रासङ्गिकं च निर्णयं स्वीकरोति । यद्येवं राजा प्रजा च विवेचनसामर्थ्यं वहतः तर्हि आदर्शसामाजिकव्यवस्थायाः निर्माणं नूनं भविष्यति ।

## सामाजिकविरोधस्य निवारणम्

शान्तिशिक्षया प्रत्येकं जनस्य संशोधनं भवति । अतः मनसि वचसि कर्मणि च एकता भवति । महात्मनः गुणः समाहितो भवति । समाजे विद्यमानानां विविधविरोधानां वारणार्थं कारणानि अन्विष्यन्ते । विरोधस्य निवारणार्थं शमनार्थं वा प्रयत्नः अपि क्रियते । समाजे आदर्शपूर्णव्यवहारस्य उत्तमपरम्परायाः च प्रामुख्यं प्राप्यते । येन सामाजिकविरोधाः निवार्यन्ते ।

## राजनीतेः विरोधस्य निवारणम्

समाजे राजनीतेः विरोधस्य प्रकारद्वयं विद्यते । प्रथमं तु अधिकारे विद्यमानः दले पक्षे वा भ्रष्टाचारस्य राजनीतिसम्बद्धः विरोधः आरभ्यते । सामान्यजनैः राजतन्त्रनियमानां सिद्धान्तानां वा विरोधः क्रियते इति द्वितीयः । शान्तिशिक्षया अधिकारे विद्यमानः पक्षः अवगच्छति यत् जनता जागरूको वर्तते, दोषयुक्तं तिरस्करोति । अतः विवेचनं कृत्वा निर्णेतव्यः । येन रजनितिसम्बद्धः विरोधः न सम्भवति अपि तु राजनीतेः विरोधस्य निवारणं भवति ।

## आर्थिकासमानतायाः निवारणम्

प्राचीनकालः धर्मप्रधानः आसीत् । अधुना धर्माचरणस्य अपेक्षया आर्थिकस्थितिः उत्तमा स्यात् । **सर्वे गुणाः काञ्चनमाश्रयन्ति** इति उक्त्यनुसारं जनाः अर्थमनुधावन्ति । आर्थिकासमानता अपि अशान्तेः एकं करणं भवति ।

शान्तिशिक्षया आर्थिकदृष्ट्या असमानतायाः निवारणं कर्तुं शक्यते । यदि मनुष्यः सम्पदः प्राधान्यं न चिन्तयति तर्हि आर्थिकासमानतायाः दुःखं न बाधते । धनस्य अपेक्षया अपि मानवसम्बन्धः मुख्यः भवतीति अवगन्तव्यम् । उक्तं कठोपनिषदि **न वित्तेन तर्पणीयो मनुष्यः**[1] इति । शान्तिशिक्षया मानवीयमूल्यानि नैतिकता च अवगन्तुं शक्यते । समाजे धनिकाः सामान्यान् न शोषयेयुः । धनिकाः सम्पदः उपयोगं मदाय न कुर्युः, अपि तु समाजस्य सेवार्थं धनस्य समाजस्य कल्याणार्थं च दानं कुर्युः ।

**ज्ञानस्य विस्तारः**

शान्तिशिक्षायाः मुख्यमुद्देश्यं भवति ज्ञानस्य विस्तारः । शिक्षितेन विवेकपूर्णव्यवहारः भवेत् इति समाजः काम्यते । ज्ञानं विवादाय न भवेत् । ज्ञानेन उत्तमरीत्या तर्कणं, चिन्तनं च कुर्यात् । ज्ञानं सर्वविधधनेषु प्रधानं भवति । व्यये कृते नित्यं वर्धते । इदं च मनुष्यस्य तृतीयं नेत्रं वर्तते । अतः नरः सामाजिक-आर्थिक-भौतिकज्ञानेन सह आध्यात्मिकज्ञानेनापि विकासं प्राप्नुयात् । शान्तिशिक्षा आध्यात्मिकज्ञानस्य विकासार्थं सहकरोति ।

**शोषणान्मुक्तिः**

शोषणं समाजस्य पीडा अस्ति । शोषणेन समाजः इति वक्तुं न शक्यते । शोषणेन समाजः समजः भवति । शोषणेन समाजे कुरीतयः उत्पद्यन्ते । उग्रवादः, नक्सलवादः, आतंकवादः इत्यादीनां कारणं शोषणम् अपि अस्ति । शान्तिशिक्षया मनवस्य कृते शोषणान्मुक्तिः लभ्यते । अनेन प्रत्येकं जनः परम्परां ज्ञात्वा तस्याः आवश्यकताम् प्रासङ्गिकतां च अवगच्छति । समाजे नियमानां निर्मातारः अपि विवेकेन मनुकुलस्य विकासाय समुचितरीत्या निर्णेतुं सक्षमाः भवन्ति । समाजः पूर्णतया शोषणान्मुक्तः भवेत् । समाजस्य पोषणं भवेत् न् तु शोषणम् ।

**क्रूरस्वभावस्य नियन्त्रणम्**

क्रूरता अशान्तिं जनयति मनसः शरीरस्य च । शरीरमनसोः क्रूरतां निवार्य शान्तेः व्यवस्थापनं शान्तिशिक्षायाः प्रधानं लक्ष्यम् । क्रूरस्वभावस्य धारणापेक्षया मानवः क्षमा गुणं धरेत् । उक्तं सुभाषितकारेण-

क्षमा शस्त्रं करे यस्य दुर्जनः किं करिष्यति ।
अतृणे पतितो वन्हिः स्वयमेवोपशाम्यति ।।[i]

क्रूरता दुरात्मनः क्षणं वर्तते । सज्जनः शान्तिप्रियः भवति । सः न दुष्टं चिन्तयति न वा क्रूररूपेण व्यवहरति । कार्यकरणात् पूर्वं चिन्तयति । मया क्रियमाणं कार्यं "सर्वजनहिताय सर्वजनसुखाय" भवेत् इति चिन्तयति ।

एवं शान्तिशिक्षायाः महत्त्वस्यावलोकनेन ज्ञायते अनया नव्यप्रवृत्या मानवस्य सर्वाङ्गीणः विकासः जायते इति । शान्तिशिक्षया बालकः शान्तेः कौशलानि अधिगच्छति । स्वस्य व्यवहारे परिवर्तनमानयति । एवं जागरूकः भूत्वा आदर्शपूर्णसमाजस्य स्थापनायै उपकरोति ।

## सन्दर्भग्रन्थाः

1. शान्तिशिक्षा एवं सतत विकास – श्रीमती राजकुमारी शर्मा, राधा प्रकाशन मन्दिर, आगरा
2. मूल्य एवं शान्ति शिक्षा – सौरभ सिंह, अग्रवाल पब्लिकेशन्स, आगरा
3. शान्ति के लिए शिक्षा – डा. शिवपाल सिंह, आर.लाल. बुक डिपो, मेरठ
4. मूल्य एवं शान्ति शिक्षा – डा. रवीन्द्र कुमार, अग्रवाल पब्लिकेशन्स, आगरा
5. शान्ति शिक्षा – डा.शोभा गोलवलकर, राधा प्रकाशन मन्दिर, आगरा

1. https://www.instagram.com/sramverma/p/Bim-cMSnfzU/

[1] .□□□□□□□□□ – 1.27